# ५ पञ्चम दशकः - सुद्युम्न कथा

जाता सुतेला मनुसप्तमस्य संप्रार्थितोऽनेन मुनि र्वसिष्ठः ।
शम्भोः कटाक्षेण सुतां कुमारं चक्रे स कालेन बभूव राजा ॥ ५-१॥

सुद्युम्न नामा मृगया विहारी गतो हयारूढ इलावृतं सः ।
स्त्रीत्वं पुनः प्राप्य सुतं हिमांशोः वव्रे पतिं पुत्रमसूत चैषा ॥ ५-२॥

न्यवेदयत्सा गुरवे वसिष्ठाय एषा कदाचिन्निज पुंस्त्व कामम् ।
तत्साधनार्थं हरमेव दध्यौ मुनिः प्रसन्न स्तमुवाच शम्भुः ॥ ५-३॥

इलावृतं मा पुरुषः प्रयातु प्रयाति चेत्सो ऽस्त्वबला तदैव ।
एवं मया निश्चित मेव सौम्य गौर्याः प्रसादाय भवान् प्रियो मे ॥ ५-४॥

न पक्षभेदोऽत्र ममास्ति गौरी भवांश्च तृप्तौ भवतां मदीयौ ।
इतः परं तस्य मनोरपत्यं मासं पुमान् स्याद्वनिता च मासम् ॥ ५-५॥

एवं शिवोक्तेन मनोरपत्यं लब्ध्वा च पुंस्त्वं धरणीं शशास ।
स्त्रीत्वे च हर्म्येषु निनाय कालं जनो न चैनं नृपमभ्यनन्दत् ॥ ५-६॥

पुरूरवस्यात्म सुतो ऽर्पयित्वा राज्यं विरक्तो वनमेत्य भूपः ।
श्रीनारदाल्लब्ध नवार्णमन्त्रो भक्त्या स दध्यौ भवतारिणीं त्वाम् ॥ ५-७॥

सिंहाधिरूढा मरुणाब्ज नेत्रां त्वां सुप्रसन्ना मभिवीक्ष्य नत्वा ।
स्तुत्वा च भक्त्या स्थिर पुंस्त्वमेष लेभेऽथ सायुज्य मवाप चान्ते ॥ ५-८॥

शौर्यं न वीर्यं न च पौरुषं मे नैवास्ति च स्त्री सहजा तितिक्षा ।
मूढो न जानाम्यशुभं शुभं च देयं त्वया मे शुभमेव मातः ॥ ५-९॥

पश्यानि मातः प्रवरान्गुरूंस्ते कारुण्यतो मां सुपथा नयन्तु ।
सत्सङ्ग सम्भावित चित्त वृत्तिः भवानि ते देवि नमः प्रसीद ॥ ५-१०॥